
द्वितीयः पाठः

शब्दपरिचयः-II



एषा का?
एषा दोला।
दोला कुत्र अस्ति?
दोला उपवने अस्ति।



सा का?
सा घटिका।
घटिका किं सूचयति?
घटिका समयं सूचयति।




एते के?
किम् एते कोकिले?
न, एते चटके।
चटके किं कुरुतः?
एते विहरतः।



ते के?
ते चालिके स्तः।
ते किं कुरुतः?
ते वाहनं चालयतः।



एताः काः?
एताः स्थालिकाः।
किम् एताः गोलाकाराः?
आम्, एताः गोलाकाराः एव।

ताः काः?
ताः अजाः।
ताः किं कुर्वन्ति?
ताः चरन्ति।




शब्दार्थाः



एषा	–	यह (स्त्री.)	this
दोला	–	झूला	swing
कुत्र	–	कहाँ	where
उपवने	–	बगीचे में	in the garden
घटिका	–	घड़ी	clock

सूचयति	–	सूचित करती है	indicates
कोकिले	–	दो कोयल	two cuckoos
एते	–	ये (द्विवचन, स्त्री.)	these
चटके	–	दो गौरैया	two sparrows
कुरुतः	–	करती हैं	do
विहरतः	–	फुदक रही हैं	hopping
चालिके	–	दो महिला ड्राईवर	female driver
चालयतः	–	चलाती हैं	drive
एताः	–	ये (बहुवचन, स्त्री.)	these
स्थालिकाः	–	थालियाँ	plates
आम्	–	हाँ	yes
एव	–	ही	only
अजाः	–	बकरियाँ	goats
चरन्ति	–	चरती हैं	graze

अभ्यासः



1. (क) उच्चारणं कुरुत।

छात्रा	लता	प्रयोगशाला	लेखिका
शिक्षिका	पेटिका	माला	सेविका
नौका	छुरिका	कलिका	गायिका



(ख) चित्राणि दृष्ट्वा पदानि उच्चारयत।


सूचिका


पिपीलिका



कुञ्चिका


द्विचक्रिका


उत्पीठिका


मक्षिका


अग्निपेटिका


मापिका


वीणा

2. (क) वर्णसंयोजनं कृत्वा पदं कोष्ठके लिखत-

यथा- क् + उ + र् + उ + त् + अः = कुरुतः

उ + द् + य् + आ + न् + ए =

स् + थ् + आ + ल् + इ + क् + आ =

घ् + अ + ट् + इ + क् + आ =

स् + त् + र् + ई + ल् + इ + ङ् + ग् + अः =

म् + आ + प् + इ + क् + आ =

(ख) पदानां वर्णविच्छेदं प्रदर्शयत-

यथा- कोकिले= क् + ओ + क् + इ + ल् + ए

(को) (कि) (ले)

चटके = ...

धाविकाः = ...

कुञ्चिका = ...

खट्वा = ...

छुरिका = ...

3. चित्रं दृष्ट्वा संस्कृतपदं लिखत-



.....


.....


.....


.....


.....


.....

4. वचनानुसारं रिक्तस्थानानि पूरयत-

	एकवचनम्	द्विवचनम्	बहुवचनम्
यथा-	लता	लते	लताः
	गीता	.....	.....
	.....	पेटिके	.....



.....	.....	खट्वाः
सा	.....	.....
.....	रोटिके	.....

5. कोष्ठकात् उचितं शब्दं चित्वा वाक्यं पूरयत-

यथा- **बालिका** पठति। (बालिका/बालिकाः)

(क) ..... चरतः। (अजाः/अजे)

(ख) ..... सन्ति। (द्विचक्रिके/द्विचक्रिकाः)

(ग) ..... चलति। (नौके/नौका)

(घ) ..... अस्ति। (सूचिके/सूचिका)

(ङ) ..... उत्पतन्ति। (मक्षिकाः/मक्षिके)

6. सा, ते, ताः इत्येतेभ्यः उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत-

यथा- लता अस्ति। - **सा** अस्ति।

(क) महिलाः धावन्ति। - ..... धावन्ति।

(ख) सुधा वदति। - ..... वदति।

(ग) जवनिके दोलतः। - ..... दोलतः।

(घ) पिपीलिकाः चलन्ति। - ..... चलन्ति।

(ङ) चटके कूजतः। - ..... कूजतः।



7. मञ्जूषातः कर्तृपदं चित्वा रिक्तस्थानानि पूरयत-

लेखिका	बालकः	सिंहाः	त्रिचक्रिका	पुष्पमालाः

(क) ..... सन्ति।

(ख) ..... पश्यति।

(ग) ..... लिखति।

(घ) ..... गर्जन्ति।

(ङ) ..... चलति।

8. मञ्जूषातः कर्तृपदानुसारं क्रियापदं चित्वा रिक्तस्थानानि पूरयत-

गायतः	नृत्यति	लिखन्ति	पश्यन्ति	विहरतः

(क) सौम्या .....।

(ख) चटके .....।

(ग) बालिके .....।

(घ) छात्राः .....।

(ङ) जनाः .....।

